NP – 052

I Semester B.C.A./B.H.M. Examination, March/April 2023
(NEP) (2021 – 22 and Onwards) (F+R)
LANGUAGE SANSKRIT – I
Buddhacharitam – III Canto, Grammar and Comprehension

Time : 2½ Hours Max. Marks : 60

***Instructions :*** *1) Answer in **Sanskrit/Kannada/English**.*
*2) Question Nos. **I, VI** and **VII** should be answered in **Sanskrit** only.*

I. समीचीनम् उत्तरं चित्वा लिखत । **(8×1=8)**
ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.
Write the correct answer.

1) बुद्धचरितम् काव्ये कति सर्गाः सन्ति ?
अ) विंशतिः आ) पञ्चविंशतिः इ) अष्टविंशतिः ई) त्रिंशत्

2) शुद्धोदनराजा कस्मिन् कुले जाता ?
अ) रघुकुले आ) चन्द्रवंशे इ) भृगुवंशे ई) शाक्यकुले

3) सेवकाः कस्य शोभां परां चक्रुः ?
अ) ग्रामपथस्य आ) उद्यानस्य इ) राजपथस्य ई) पर्वतस्य

4) स्यन्दनं कति तुरङ्गैः युक्तमासीत् ?
अ) पञ्चभिः आ) चतुर्भिः इ) सप्तभिः ई) नवभिः

5) स्त्रीणां मुखपङ्कजानि कुत्र शोभन्ते स्म ?
अ) गृहेषु आ) द्वारेषु इ) वातायनेषु ई) उद्यानेषु

6) नराः कुत्र गन्तुकामा इव बभुः ?
अ) गाम् आ) नगरम् इ) उद्यानम् ई) द्याम्

7) स्मृतीनां नाशः का ?
अ) जरा आ) बला इ) कला ई) सुरा

8) रोगेण कः अपि अस्वतन्त्रः कृतः ?
अ) अग्निः आ) वरुणः इ) शक्रः ई) यमः

P.T.O.

II. एकस्य प्रश्नस्य उत्तरं लिखत । (1×8=8)

ಒಂದು ಪ್ರಶ್ನೆಯನ್ನು ಉತ್ತರಿಸಿ.

Answer **any one** of the following.

1) सिद्धार्थस्य विहारयात्रां तस्याः परिणामं च विवृणुत ।
   ಸಿದ್ಧಾರ್ಥನ ವಿಹಾರಯಾತ್ರೆ, ಹಾಗೂ ಅದರ ಪರಿಣಾಮವನ್ನು ವಿವರಿಸಿ.
   Describe the excursion of Siddhartha and its impact.

2) बुद्धचरित काव्यस्य तृतीयसर्गस्य सारांशं लिखत ।
   ಬುದ್ಧ ಚರಿತ ಕಾವ್ಯದ ಮೂರನೇ ಸರ್ಗದ ಸಾರಾಂಶವನ್ನು ಬರೆಯಿರಿ.
   Write the summary of third Canto of Buddhacharitam.

III. द्वयोः विषययोः लघुटिप्पणीं लिखत । (2×4=8)

ಎರಡು ವಿಷಯಗಳನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any two** of the following.

1) महाकाव्यलक्षणम्

2) शुद्धोदनः

3) अश्वघोषः

4) सूतः ।

IV. चतुर्णां श्लोकानाम् अनुवादं कृत्वा विवृणुत । (4×3=12)

ನಾಲ್ಕು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate and explain **any four** of the following :

1) निवर्तयामास च राजमार्गे
   सम्पातमार्तस्य पृथग्जनस्य ।
   माभूत्कुमारः सुकुमारचित्तः
   संविग्नचेता इति मन्यमानः ।।

2) ततः स जाम्बूनदभाण्डभृद्भिः
   युक्तं चतुर्भिर्निभृतैस्तुरङ्गैः ।
   अक्लीबविद्युच्छुचिरश्मिधारं
   हिरण्मयं स्यन्दनमारूरोह

3) तं सुष्टुवुः सौम्यगुणेन केचित्

ववन्दिरे दीप्ततया तथान्ये ।

सौमुख्यतस्तु श्रियमस्य केचित्

वैपुल्यमाशंसिषुरायुषश्च ।।

4) पीतं ह्यनेनापि पयः शिशुत्वे

कालेन भूयः परिमृष्टमुर्व्याम् ।

क्रमेण भूत्वा च युवा वपुष्मान्

क्रमेण तेनैव जरामुपेतः ।।

5) ततो बभाषे स रथप्रणेता

कुमार साधारण एष दोषः ।

एवं हि रोगैः परिपीड्यमानो

रूजातुरो हर्षमुपैति लोकः ।।

6) ततः प्रणेता वदतिस्म तस्मै

सर्वप्रजानामभयमन्तकर्ता ।

हीनस्य मध्यस्य महात्मनो वा

सर्वस्य लोके नियतो विनाशः ।।

(2×3=6)

V. **द्वयोः** वाक्ययोः सन्दर्भं विवृणुत ।

ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Explain with reference to context **any two** of the following.

1) स्नेहान्न चैनं मनसा न मुमोच ।

2) देवानुयायि ध्वजवत् प्रणेमुः ।

3) एषा जरा नाम ययैष भग्नः ।

4) शक्रोऽपि येनैष कृतोऽस्वतन्त्रः ।

VI. संस्कृतभाषया उत्तराणि लिखत ।

अ) पदानि उपयुज्य वाक्यानि रचयत । (पञ्चानामेव) **(5×1=5)**

1) गच्छति
2) बालिका
3) सर्वदा
4) मम
5) यथा–तथा
6) पठित्वा
7) शाला
8) अत्र

आ) **एतेषां** नामपदानां लिङ्ग–विभक्ति–वचनानि लिखत । **(पञ्चानामेव)** **(5×1=5)**

1) अहम्
2) नगराणि
3) राजपुत्रः
4) देवैः
5) ग्रामात्
6) स्त्रीणाम्
7) सूताय
8) गृहम्

VII. **गद्यभागं** पठित्वा अधोलिखित प्रश्नानाम् उत्तराणि लिखत । **(4×2=8)**

ऋषिवर्याः आश्रमेषु निवसन्ति । आश्रमाः नदीनां तटेषु वर्तन्ते । तापसाः नगरजीवनं न इच्छन्ति । नगरजीवनं चित्तं कलुषयति । आश्रमपरिसरः प्रशान्तः वर्तते । आश्रमं परितः उन्नताः वृक्षाः सन्ति । तापसानां तप एव धनम् । तेषां प्रभावेण वन्याः मृगाः अपि दौर्जन्यं त्यजन्ति ।

**प्रश्नाः :**

1) तापसाः किं न इच्छन्ति ?
2) कः प्रशान्तः वर्तते ?
3) तेषां प्रभावेण के दौर्जन्यं त्यजन्ति ?
4) आश्रमाः कुत्र वर्तन्ते ?

---